उटजेषु मुनयः यजन्ति.

XXIII

पुण्यसलिलेषु नग्नाः नावतरेयुः.
आरामस्य वृतिं कण्टकैः कुर्वन्ति.
वृक्षाणां शाखासु फलानि लम्बन्ते.
डिम्भस्य नेत्रे अञ्जनेन अलङ्कुरु.
अयसा गवाक्षाः क्रियन्ते.
दाराः रूप्याणि मञ्जूषायां निक्षिपन्ति.
छत्राणि वृष्टिं आतपंच वारयन्ति.
गृध्राः वियति अहनि डयन्ते.
अर्भकाः कन्दुकैः आरामे रमन्ते.
मृगयुः वागुरया मृगान् गृह्णाति.
पथिकौ पन्थानं गोविन्दंपृच्छतः.
क्षीरसागरे कल्लोलाः पूर्णिमायां संवि-
[वर्धन्ते.

XXIV

गङ्गायाः आवर्तेषु नावः भ्राम्यन्ति.
सलिलेषु बुद्बुदाः उद्भवन्ति.
कावेर्यां बालुकाः अतिधवळाः सन्ति.
गोदावर्यां कर्णधारौ नावौ नुदतः.
धीवराः यादांसिजालैः जगृह्णुः.
राजभटैः चोराः कारागृहे प्रास्यन्ते.
ममनिष्कुटे शाकं सः अपचिनोति.
जरठाः दण्डान् गृहीत्वा शनैः यान्ति.
वाणिज्येन वणिजः देशान्तरं गत्वा
[जीवन्ति.
इक्षुरसेन गुडः क्रियते.
गोदावरीतीरे बृहन्मरीचं जायते.
जीरकः अगदाय भिषजा उपयुज्यते.

XXV

केरळदेशे क्रमुकं उत्पद्यते.
अस्य उरः व्यायामेन कठिनं अभवत्।
वनिताः कटिषु रशनाः बध्नन्ति.
नृपाः रिपून् आहूय शिरांसि न्यपातयन्।
भीमः दुर्योधनस्य ऊरुं गदया बिभेद।
रामः सुग्रीवप्रत्ययाय दुन्दुभेः अस्थि
[चिक्षेप.
जनकः सूनुं सान्त्वयति.
कानिष्ठिकायाः तत् रत्नं जले निपपात.
चतुष्पथे महाजनाः प्रातः आरभ्य
[आसायं गच्छन्ति.

द्वितीयमञ्जरी——(*Continued*).

नृपाः स्वपुरमभितः परिखाः अकुर्वन्.
नगरेषु प्रतिसदनं तोरणमालाः बध्यन्ते.
पौराः राज्ञां कार्याणि भिया सदा [कुर्वन्ति.

XXVI

ग्रामीणाः सस्यकर्माणि अतिनिपुणाः [भवेयुः
पल्वलेषु खगाः पयः विबन्ति.
वसन्तकाले तरुषण्डेषु पल्लवाः उद्भव- [न्ति.
ग्रीष्मकाले नराः तालवृन्तैः श्रमं अप- [नुदन्ति.
जम्भीरफलानि उपदंशाय मानुषाः उप [युञ्जन्ति.
हरिः वटपत्रपुटे लोकानुग्रहाय सदा [शेते.
अटव्यां योगिनः कन्दमूलानि अदन्ति.
पद्मेषु किञ्जल्काः प्रकाशन्ते.
इनवंशे रामः समजनि.
यदुकुले भक्तरक्षणाय कृष्णः अवततार.
पल्वलेषु महिषाः लुठन्ति.
गोपाः गोभ्यः क्षीरं दुहन्ति.

XXVII

निशि सृगालाः उच्चैः स्वनन्ति.
उष्ट्राः निम्बपत्रेभ्यः स्पृहयन्ति.
सारमेयाः रथ्यायां धावन्ति.
रजकाः खरेषु पटग्रन्धीन् बध्नन्ति.
ऋक्षाः गिरिगह्वरेषु निद्रान्ति.
नकुलाः उरगान् घ्नन्ति.
पिपीलिकाः अङ्गानि दशन्ति.
मशकाः रात्रौ मनुजान् बाधेरन्.
मत्कुणाः पर्यङ्केषुसन्ति.
शुकानां पक्षाः रम्याः द्योतन्ते.
मयूराणां चञ्चवः दीर्घाः विलसन्ति.
मार्जाराः मूषिकान् स्वादन्ति.

XXVIII

शकटमारुह्य नगरं गमिष्यामि.
तरुः फलभारेण नमति.
पत्तने उद्योगिनः उष्णीषान् धरन्ति.
बालिकाः पादेषु नूपुराणि धरन्ति.
मनुजाः अल्पसाराः प्रदृश्यन्ते.
सुरापानेन मनः भ्रमति.
केचन कळञ्जं भक्षयन्ति.
केचित् रामठं खादन्ति.
लूताः तन्तुषुप्रधावन्ति.
बधिराः श्रोतुं नशक्नुवन्ति.
डिम्भाः उषसि उत्थाय पाठान् पठेयुः
भक्ताः हरिं व्यजनैः वीजयन्ति.

द्वितीयमञ्जरी —(*Continued*).

XXIX

ललनाः कुरवकाणि कर्णेषु निक्षिपन्ति.
मरीचं केरळदेशे उत्पद्यते.
लवणं समुद्रवेलायां जायते.
दाक्षिणात्याः अधिकं तिन्त्रिणीकंभुञ्जते.
सर्षपः सर्वत्रफलति.
कुल्माषः कृष्णातीरे एधते.
द्वादश्यांसर्वेपि अतसीपत्रं अपेक्षन्ते.
चणकः गोदावर्यां जायते.
कोलार्ग्रामे हेम संभवति.
समुद्रेविद्दमम् जायते.
ताम्रं रजतंच अमरिकादेशे लभ्येत.
आस्टेलियादेशे नागं त्रपुच भवति.

XXX

अयः ऐरूपाप्रदेशे उद्भवति.
मुक्ताफलं समुद्रे जायते.
इक्षोः गुडः उत्पद्यते.
आढक्याः सूपः जायते.
गोपाः दुग्धंदुहन्ति.
पितृदिने आर्याः मुद्गसूपमेव अदन्ति.
मत्करे काचमेकमपि नास्ति.
पिपीलिकाभिया गृहिणी घृतपात्रंशिक्ये निक्षिपति.
बेचन सस्यानि घटीयन्त्रैः संवर्धयान्ति.
धनिकाः कौशेयानिधरन्ति.
शिवः गजचर्म सायं धृत्वा नृत्यति.
अवग्रहेण जनाः क्लिश्नन्ति.

XXXI

वर्षाकाले इरंमदाः पतंति.
मेघाः करकान् वर्षन्ति.
गवां ऊधस्सु क्षीराणि पूर्णानि सन्ति.
कानने मृगः मृगतृष्णिकां दृष्ट्वा जल [मितिभ्रमति.
मयि तव विचिकित्सा मास्तु.
डिम्भाः प्रातः उपदंशेनसह जलोदनं [अश्नन्ति.
ईश्वरः सदासर्वान् अवतु.

CHAPTER V—*A*.

॥ प्रथममञ्जरी ॥

श्रीरामायणसंग्रहः ।

श्रीसीतारामपादाब्जान्याभिवाद्य तनोम्यहम् ।
सुखबोधाय बालानां श्रीरामायणसङ्ग्रहम् ॥ प ॥ १ ॥
आसीदयोध्या नगरी देशे कोसलनामनि ।
तस्याम् श्लाघ्यगुणश्श्रीमान् राजा दशरथोऽवसत् ॥ प ॥ २
तस्यकौसल्येति सुमित्रेति कैकेयीतिच तिस्रोभार्या बभूवुः ॥ ग ॥ ३
कैसल्या सुषुवे राममभिरामगुणाकरम् ।
श्रीरामभक्तिभरितं भरतं केकयात्मजा ॥ प ॥ ४ ॥
अथ लक्ष्मणशत्रुघ्नौ प्रासूयेतां सुमित्रया ।
एते कुमाराश्चत्वारः व्यवर्धन्त दिनेदिने ॥ प ॥ ५
दशरथस्तु चौलोपनयनादीन्यथाकालं विधाय ।
विधीनधीतनिखिलविद्या नुपाध्यायै रकारयत् ॥ ग ॥ ६ ॥
अथकदाचित् यातुधान विध्वंस्यमानसत्रपरित्राणाय ।
विश्वामित्रनामा मुनिरुपगम्य दशरथमयाचत रामंसलक्ष्मणम् ॥ ग ॥ ७
प्राहिणोन्मुनिसन्त्रासात्प्रियावपि सुतौ नृपः ।
सराजपुत्रावनयदटवीं कथयन्कथाः ॥ प ॥ ८
सत्यप्यरण्य संचारे श्रमस्यानुदयायसः ।
उपादिशत्तयोर्विद्ये बलामतिबलामपि ॥ प ॥ ९ ॥
वनमध्ये गच्छतामेतेषां पदवीं ताटकानाम राक्षसीरुरोध ॥ ग ॥ १० ॥

प्रथममञ्जरी—(*Continued*).

स्त्रियमपिजगदपकारिणीं तांदाशरथिर्गाधि ।
तनयानुमत्याव्यापादयामास ॥ ग ॥ ११ ॥

अस्त्राणि जृम्भकादीनि तपस्विनि तयोस्ततः ।
उपदिश्यप्रविश्य स्वमाश्रमं कुर्वतिक्रतुम् ॥ प ॥ १२ ॥

शूरौ सुबाहुमारीचौ शैलशोणितवर्षिभिः ।
रक्षोभिस्सहसंक्षोभं चक्रतुस्ताटकासुतौ ॥ प ॥ १३ ॥

दशरथात्मजस्तु मातरिश्वास्त्रेण मारीचमपांपतौनिपात्य सुबाहुप्रमुख कोणपगणमेकेनैव बाणेनलीलयैव सूदयामास ॥ ग ॥ १४ ॥

विश्वामित्रस्तु निरन्तरायं परिसमाप्य सप्ततन्तुं रघुसुताय जनक सुतां दिदापयिषुर्मिथिलां प्रति प्रतस्थे ॥ ग ॥ १५ ॥

रामपादरजस्सङ्गा त्प्रकृतिं गतयापथि ।
अहल्ययागौतमस्य जाययायमपूज्यत ॥ प ॥ १६ ॥

तदनुमिथिलां प्रविश्य परिगृहीतातिथ्ये कौशि केनिजागमनकारणमा-वेदयति जनकेनप्रदर्शितं शिवशरासनं दशरथात्मजो बभंज ॥ ग ॥ १७ ॥

जातानन्दस्तु जनकोदूतै रत्वरितगामिभिः ।
आह्वापयद्दशरथं सकुटुंबपुरोधसम् ॥ प ॥ १८ ॥

अथोत्तमेमुहूर्ते स रामाय धरणीसुताम् ।
सीतामदादात्मसुतां ऊर्मिळां लक्ष्मणायच ॥ प १९ ॥

अथनिजानुजस्य कुशध्वजस्य तनुजे मांडवीश्रुतकीर्ती भरतशत्रुघ्नाभ्यांच दत्वाशुभे ऽहनि विवाहमकरोत् ॥ ग ॥ २० ॥

प्रथममञ्जरी—(*Continued*).

अथानुरूपजायाभिरुपेतैस्तनयैस्समम् ।
प्रतस्थेकोसलपतिः साकेतनगरंनिजम् । ग ॥ २१ ॥

जिगीषयागतंरामं भार्गवंरघुवंशजः ।
रामोजिगायजायिन मालिलिङ्गनृपस्सुतम् ॥ प ॥ २२ ॥

अथप्रविश्यनगरंसाकेतंरघुनन्दनः ।
सीतयारममाणस्सन्सम्मोदंसमविन्दत ॥ प ॥ २३ ॥

इतिबालकाण्डः.



CHAPTER V—*B*.

द्वितीयमञ्जरी.

ततोभरतशत्रुघ्नौतातादेशेनजग्मतुः ।
युधाजिदभिधानस्यमातुलस्यपुरंप्रति ॥ प ॥ १ ॥

रामाभिषेचनंकर्तुंयतमानंमहीपतिम् ।
मन्थराकुलितस्वान्ता कैकेयीदुर्वचोऽब्रवीत् ॥ प ॥ २ ॥

यदित्वं सत्यसङ्गरोसि शंवरमङ्गरसमुदीरितवरयुगळे प्रथमस्यफलं
रामस्यवनवासं द्वितीयस्य भरताभिषेचनं चविधेहि ॥ य ॥ ३ ॥

नैवंयदि पश्यतस्तव प्राणान् त्यजामीति ॥ ग ॥ ४ ॥

इदंपरुषमाकर्ण्य मूर्छितोनृपतिर्भुवि ।
पपातवज्रनिर्भिन्नपक्षः पर्वतराडिव ॥ प ॥ ५ ॥

असत्यभीतोनृपतिश्चिरेणप्राप्यचेतनाम् ।
कैकेयींप्रार्थयामास रामस्यपुरिवर्तनम् ॥ प ॥ ६ ॥

बहुधाप्रार्थ्यमानापि सामुमोचनचाग्रहम् ।
निममज्जमहीजानि रपारेशोकसागरे ॥ प ॥ ७ ॥

वनं गच्छामि तातेतिप्रणम्याप्रच्छ्यराघवः
साकंसौमित्रि सीताभ्यां समारुक्षद्रथंरथी ॥ प ॥

सर्वाननुगतान् पौरान् वंचयित्वा विनिद्रितान् ।
शाद्वलेनपथारात्र्यां सजगामसुरापगाम् ॥ प ॥ ३ ॥

तत्रनिवसतागुहाभिधानेन व्याधेनसुहृदा समुत्तीर्यसुरतरङ्गिणीं
अवाप्य चित्रकूटगिरि मनुजविरचित वरिवस्यः सहसीतया
चिरमरमत रघुवरः ॥ ग ॥ १० ॥

द्वितीयमञ्जरी—(*Continued*).

महतापुत्रशोकेन दिवंदशरथोययौ ।
दूतैर्भरतमानिन्युरमात्या राशुगामिभिः ॥ प ॥ ११ ॥

सचसमाकर्ण्य सकलां प्रवृत्तिं निपत्य संज्ञाविरहितस्सर्वसहाया मवाप्य चिरायचेतनां विरम्य वसिष्ठादिनिरोधेन कैकेयीमन्धरामारणा द्विधायौर्ध्वदैहिकं दशरथाय प्रस्थाय निखिलपौरै स्समनुपेत्य चित्रकूटाचलमवनिजाजानेश्चरणारुणांबुजयुगळेनिपपात ॥ ग ॥ १२ ॥

मृतमाकर्ण्य पितरं शुचादत्वा जलांजलिं ।
पप्रच्छ भरतंभद्रं पौराणां परमःपुमान् ॥ १३ ॥

ततस्सपादपतनं भरतेनार्थितोऽपिसः ।
नजगामपुरंरामः तातादेशमनुस्मरन् ॥ ध ॥ १४ ॥

अनन्तरमग्रजादेशेनायोध्यामुपेत्यभरतो नन्दिग्रामे रघुनन्दनवत्जटा वल्कलधारीसन् सिंहासनप्रतिष्ठापिताभ्यां रामपादुकाभ्यां राज्यकार्याणिविज्ञापयन् रामागमनदिवसान् गणयन्नवास ॥ ग ॥ १५ ॥

रघुवंशपयोराशिशीतांशुरथराघवः ।
आश्रमादाश्रमंगच्छन् प्राविशद्दण्डकावनम् ॥ पै ॥ १६ ॥

इति अयोध्याकाण्डः

विराधमसुरंश्वभ्रेविखनन्दण्डकांविशन् ।
शरभंगमुनिंरामो नत्वागस्त्यमुपाविशत् ॥ प ॥ १ ॥

तद्दत्तानीन्द्रचापादीन्यादायसहसीतया ।
पञ्चवट्यां चिरंरामो रेमेऽनुजकृतोऽटजे ॥ प ॥ २ ॥

द्वितीयमञ्जरी——(*Continued*).

तत्रैकदाचन हेमन्तसमये रावणानुजा शूर्पणखाभिधाना यातुधानी सौन्दर्यसलिलशालिधि दाशरथिंनिरीक्ष्यभर्तामम भवान्भवत्वि-तिनिर्बबन्ध ॥ ग ॥ ३

परिग्रहीतुमात्मानंदाशरथ्योरनिच्छतोः ।
सीतामाहर्तुमिच्छन्तीसाभ्यधावन्निशाचरी ॥ प ॥ ४ ॥

प्रजावतीं जिघांसन्त्याः तस्यास्सौमित्रिरात्मवान् ।
छित्वाकृष्यच्छुरिकयाकर्णनासमदिद्रवत् ॥ प ॥ ५ ॥

तदनुपरिदेवनरवेण कुलगिरिगह्वरनिद्राणकेसरिणः समुद्बुजयन्ती पलाय्यजनस्थानंप्रति तत्रनिवसन्ति चतुर्दश सहस्राणि यातूनि तदधिपतींश्चखरदूषणत्रिशरसो दशकन्धरबन्धूंश्चधुरंन्धर निराकरणाय निर्यापयतिस्म ॥ ग ॥ ६ ॥

आयान्तमसुरानीकं आलोक्यावानिजापतिः ।
आदिश्यलक्ष्मणंसीतारक्षणेसधनुर्ययौ ॥ प ॥ ७ ॥

रामस्ततोराक्षसवीरवाहिनींविनाशयामासशरौघ वृष्टिभिः । जेतारमायान्तमवेक्ष्यजानकी समाश्लिषत्सत्वरमात्मवल्लभम् ॥ प ॥ ८ ॥

तदनुजनस्थाने विजनस्थानेसति लंकांप्रति प्रधाव्यसदासि निपत्यचिरं-विलप्यानिवेदितोदन्तां विकृतमुखीं शूर्पणखां दशमुखो-विलोक्य पटपटाकृत्यदंतान्, सुवर्णहरिणवर्ष्मधारिमारीच-सहायः परिव्राजिकभूमिकाच्छादितोरघुशार्दूलपर्णशालाभ्य-र्णमाजगाम ॥ ग ॥ ९ ॥

धासान् घसन्तंहरिणं सौवर्णंप्रेक्ष्यमैथिली ।
आनीयदेहिनाथेति प्रैषयत्प्राणवल्लभम् ॥ प ॥ १० ॥

द्वितीयमञ्जरी——(*Continued*).

दूरंगतस्तमसुरं क्रियया विभाव्य विव्याध शातविशिखेन रघुप्रवीरः
तुक्रोशदाशरथिवत्स मृगोहतोऽस्मिहा लक्ष्मणानुजसखेसखि
मैथिलीति ॥ प ॥ ११ ॥

तेनार्तनादेनविपन्नपरित्रातारमपितमागन्नं विज्ञाय दवरंप्रेषितवर्ती
दशरथस्नुषां दशवदनो बाहुभिर्निजरथं आरोप्य तत्पक्ष-
पातेन योद्धुमभियातस्य जटायुपः पक्षपातं विधाय लंकां
प्रविश्याशोकवनिकायामेनामतिभयङ्कर राक्षसीपरिवृतांस्थाप-
यां बभूव ॥ ग ॥ १२ ॥

अध्वन्यायान्तमनुजमालोक्योऽद्विग्नमानसः ।
सीतामपश्यन्नुटजे व्यलपद्राघवस्ततः ॥ प ॥ १३ ॥

सीतापतिर्धरणिजामथ मार्गमाणः शीर्णप्रतीक मुदिताशरराजकृत्यं ।
संस्कृत्यगृध्र नृपतिं विकृतंकबन्धं कृत्वाविदोषममलाम्बुमवापपम्पा ॥

इति आरण्यकाण्डः ॥

ततः कपिर्वालिभयान्निलीन स्सुग्रीवनामा चिरमृश्यमूके ।
कोदण्डतूणीरधरौ कुमारौ दृष्ट्वा भियाग्रजभृत्यमत्या ॥ प ॥ १ ॥

चिकीर्षुरेतस्य हितं हनूमान् धृत्वा परिव्राजकभूमिकां दाक् ।
गत्वा समानीय नरेन्द्रपुत्रौ मैत्रीमतानीत् प्लवगाधिपस्य ॥ प ॥ २ ॥

ततःपर मन्योन्यविनिवेदितभूतपूर्वनिजकथौ कपिनर
वरौ परस्परं वैरिवधाय विरचितसङ्गरौ बभूवतुः ॥ ग ॥ ३ ॥

सुग्रीवविस्रंभकृते सदुन्दुभे श्शरीरमुत्सार्य पदाङ्गुळीनग्रात् ।
सप्तापिसालान् गिरिनाकलोकौ बिभेद बाणेन बिडौजसा समः ॥ प ॥

द्वितीयमञ्जरी——(*Continued*).

ततःप्रतीतः कपिपार्थिवोसावृक्षीपुत्रेण समं न्ययुध्यत् ।
भ्रातोस्तयोर्भेदमनाप्नुवानो ऽभूत् तूष्णीं भरताग्रजन्मा ॥ प ॥ ५ ॥

अथ सद्युकुलतिलको वालिबलासहिष्णुतया कान्दिशीकमपित्रपावशादवनतग्रीवं सुग्रीवं सुमनमालालंकृतग्रीवं विधाय वधाय वालिनो विधत्स्वायोधनमिति पुनर्न्ययुयुजत् ॥ ग ६ ॥

तथाकुर्वति सुग्रीवे तरुस्कन्धतिरोहितः
जघान रामो बाणेन वालिनं जयशालिनम् । ५ ॥ ७ ॥

तारावलीमुखगण स्तारेय स्तरणेस्सुतः ।
भर्तृ नेतृ पितृ भ्रातृ दुःखेन व्यलपच्चिरं ॥ प ॥ ८

तदनु निर्वर्तितसंगरो रघुधुरंधरः पुरंदर तनयस्यौर्ध्वदैहिकं कृतवन्तं कपिपार्थिवन्त मभिषिच्य राज्ये माल्यवति गिरावतिवाहयां चकार वर्षादिवसान् ॥ ग ॥ ९ ॥

ततो राज्यसौख्यानुभवप्रमत्तं मर्कटपतिं ।
सौमित्रिर्भीषयित्वा रामनिकटं निनाय ॥ ग ॥ १० ॥

सीतां विचेतुं प्लवगान् सर्वानाहूय भानवः ।
विधाय मासमवधिं प्राहैषीत्सकलादिशः ॥ प ॥ ११ ॥

हनुमज्जांबवदंगद नील प्रमुखा याम्यां दिशमभियाताः ।
द्वादशयोजन परिमितमिरिणं प्राप्य श्रांताः प्रययुर्विपिनम् ॥ प ॥ १२

ततस्स्वयंप्रभागुहां प्रविश्य हेमपादपां मधूपहार विस्मृतस्वकार्य रीतयोऽभवन् ।
गतेऽवधौ कदाचन प्लवंगमेन केनचित्प्रबोधिता प्रलेपुरुच्चकैः प्लवंगमाः ॥ प ॥ १३ ॥

द्वितीयमञ्जरी——(*Continued*)

अथगुहाधिनाधा स्वयंप्रभा चेमान्त्रामदूतान्विज्ञाय फलै र्मधुभिश्च समाराध्य मीलितनयनान् क्षणएव गुहाबहिर्विन्ध्यागिरिं प्रावेशयत् ॥ ग ॥ १४ ॥

जानक्यलाभा त्समयातिपातात् प्रायोपविष्टान् प्रजगाद कीशान् ।
संपातिनामा सहजो जटायो र्लङ्कापुरस्थां रघुवीरपत्नीम् ॥ प ॥ १५

हृष्टास्सर्वे दशमुखपुरीं यातुकामाः कपीन्द्राः दृष्ट्वा पारं जलधिमभवन्दक्षिणं भग्नवेगाः ।
तुष्टावाथ श्वसनतनयं जांबवान् पूर्ववेदी तुष्टोसावप्यभवद्धृदये लंघने बद्धसन्धः ॥ प ॥ १६ ॥

॥ इति किष्किन्धाकाण्डः ॥

———

CHAPTER V—*C.*

॥ तृतीयमञ्जरी ॥

ततोमहेन्द्र शिखारा दुप्लुत्य हनुमान् बली ।
सुरसासिंहिके भित्वा लंकावहि रवातरत् ॥ प ॥ १ ॥

मायं प्रविश्य [illegible] विचेकाय स. ।
कुत्राप्यदृष्ट्वा वैदेहीं रावणान्तःपुरं ययौ ॥ प ॥ २ ॥

तत्र रत्नपर्यङ्के रावणेन सह शयानां रतिमिव त्रिभुवनसुन्दरीं मन्दोदरीं निरीक्ष्य समीक्षिता क्षितिसुतेति मुदितः पवनतनयः काकुत्स्थदयितेयं नैव भवेदिति निश्चित्य पुरस्तात्पानशालां मन्विष्या शोकवनिकायां पिशाचीभिरिव भयंकराभिः राक्षसीभिः भर्त्स्यमाना कनकसालभंजिकामिवा वनिदुहितरं सवेक्ष्य तान्निवासभूतस्य शिंशुपातरो रुपरि पत्रसंचये निलीय शृण्वन् तदालापान् अवतस्थे ॥ ग ॥ ३ ॥

ततोऽतीतत्रियामायां त्रियामायां दशाननः ।
प्रबुध्यागत्य वैदेहीं भवभार्येत्ययाचत ॥ प ॥ ४ ॥

तृणाय मन्यमानासा रावणं राक्षसेश्वर ।
निनिन्द विविधै र्वाक्यैः परुषैः कर्णदारिभिः ॥ प ॥ ५ ॥

अथ नक्तंचरपतौ सीतया धिक्कृते गते ।
राक्षस्यः क्रोधसंरब्धाः जानकीं समतर्जयन् ॥ प ॥ ६ ॥

अशक्नुवन्ती तांबाधां सोढु मुद्बन्धना दसून् ।
मोक्तुंपादपशाखायां वेणीमासंजयन्त्यभूत् ॥ प ॥ ७ ॥

तृतीयमञ्जरी—(*Continued*)

ततोवतीर्य हनुमा नभिवाद्य महीसुतां ।
देवि मां विद्धिरामस्य दूतमित्यब्रवी द्वचः ॥ प ॥ ८ ॥

गणयन्त्या स्वात्मानं रावणं कामरूपिणं ।
विश्वासाय ददौ धीमान् रामनामाङ्कुळीयकम् ॥ प ॥ ९ ॥

कथयामास हनुमान् काकासुरकथामपि ।
विस्रब्धाचाथ सुदती जानकी कपिमब्रवीत् ॥ प ॥ १० ॥

मासेभवान् रघुपतिं सह लक्ष्मणेन नानेष्यत यदि ।
भवामि परासुरेवं । संदिश्य सन्दशनापहितं महार्घं चूडामणिं
कपिवरस्य करे ददौ सा ॥ प ॥ ११ ॥

अथगमनाय तदनुमतिं भवाप्य निजागमन मसुरावनिजाने बुबोध-
यिषुरशोकवानेका मभांक्षीत् ॥ ग ॥ १२ ॥

विदितोदन्तस्य पटपटायित दन्तस्य दशकन्धरस्य निदेशेन समागता-
नशीतिमहस्राणि किंकरान्नाम राक्षसान् प्रहस्तसुतं जंबु-
मालिनं पंचसेनापतीं स्त्रावणात्मज मक्षंच दङ्घि नखै र्वालेन
पादपै र्गंडोपलै स्तदानीतै रायुधैश्च क्षणेन निहत्य संवर्त-
समयसमवर्तीवा वतस्थे ॥ ग ॥ १३ ॥

अथेन्द्रजेत्रा द्रुहिणास्त्रबद्धो विमोचितोऽभूच्छणरज्जुबन्धैः ।
तथापि कार्याय निबद्धवत्कपिः सभामगादाशरनायकस्य ॥ प ॥ १४

तत्रराक्षसशार्दूलै स्सेवितस्याशरेशितुः ।
सिंहासनादुच्चतरे वालसिंहासने स्थितः ॥ प ॥ १५ ॥

कस्त्वं कुतस्त्यः कुलत्यः किमुद्दिश्य समागतः ।
इति दैतेयपतिना पृष्टः पावनिरब्रवीत् ॥ प ॥ १६ ॥

तृतीयमञ्जरी—(*Continued*).

अस्ति कश्चन रामोनाम दैतेयनिबर्हणे प्राचीनबर्हिषस्सहायस्य दशरथस्य जठरान्निखिलनिशाचरवधाय धरण्यां अवतीर्णः ताटकाटवीदवकृपीटयोनिः सुबाहुमारीच प्रमुखपलाशन जालतूलवातूलः सापराधविराधवधविधायी मंदेतरकंदर्पदर्प शूर्पणखामुखविकारंकारी खरदूषणप्रमुख रक्षोगणकक्षाशु-शुक्षणिः, शापान्ध कबन्ध बंधविमोचनश्च ॥ ग ॥ १७ ॥

किंच स्मरासिकिल धनुर्गुणनिष्पन्दीकृत विंशति भुजं विनिश्वसद्वदन-परंपरं भवन्तमपरिमेय वीर्यार्जनः कार्तवीर्यार्जुनः कारागारे अस्थापयदिति ॥ ग ॥ १८ ॥

तमपि जितवतः परशु धारया क्षितिमक्षत्रिया मेकविंशातिकृत्वः कृत-वतो जामदग्न्यस्य गर्वदहन निर्वापयितायं ॥ ग ॥ १९ ॥

व्यस्मार्षीः किमखिललोकाभिनन्दनीय बाहुवलशाली, वाली स्वाजि-घृक्षयोपेत्य पृष्ठतस्समाश्लिष्टवन्तं भवन्त मजानानइव वाल धिनातवशिरःकरपादं निश्चलंनिर्बध्य नित्यकृत्यानुष्ठानवशा च्चतुरर्णवार्णसि निमज्जय्य समागच्छान्किष्किन्धां किमयं महाराजस्य वालधौ जलधिनिमज्जनसमयसंलग्नो जलूका-विशेष इति सविनयं विज्ञापयद्भिः वानरवरैः प्रतिबोधितो धुणधावं धुतवानिति ॥ ग ॥ २० ॥

तमपि प्रियसुहृद स्सुग्रीवस्य प्रियतमापहरण कोपेनैकेनैव रोषेण कृतान्त निशान्तातिथीकृतवानयं ॥ ग ॥ २१ ॥

एवंविध स्सपुरुषोत्तमो लंकामिमां भस्मसात्कर्तुमाज्ञामात्रं प्रतीक्षमाणेन लक्ष्मणेन सुहृदाच सुग्रीवेण मदन्यवानरवरकोटीभिस्सह उपास्यमानेन महान्तं माल्यवन्तं सानुमन्तं सुरालयं सुराधिप इवाधिवसति ॥ ग ॥ २२ ॥

तृतीयमञ्जरी—(*Continued*).

पुरुषाधमस्तु भवान्पंचाननयोः पुरतस्स्थातुमशक्तो जंबुकइव बहिर्गतयो स्तयो र्मनुजसिंहयो : परिगृहीतपरिव्राजिकभूमिक : प्रविश्य पर्णशालामनघां जनकनान्दिनीं अचुचुरात्किल ॥ ग ॥ २३ ॥

तस्यामार्गगवेषणाय कपिषु प्रस्थापितेष्वेककः तीर्त्वाहं जलधि प्रविश्य नगरीं दृष्ट्वा विदेहात्मजां ।

ज्ञातव्यं भवतामसागमन मित्यारामभंगंव्यथां वीरानप्यहनं रणे दशमुखज्ञातं किमाद्यंन्ततः ॥ प ॥ २४ ॥

जाया विधेयेत्यमति र्भवान्यांइच्छत्यपापां रघुवीरपत्नीं । त्वत्प्राणवाताहरणाय जातां जानीहितां कालभुजंगकन्यां ॥ प ॥ २५ ॥

सखा ते सुग्रीवो हितमवददार्यां जनकजां रघुश्रेष्ठं रामं गमय करिणीं कुंजरमिव ।

नचेदेवं रामानुज शरशतै र्यातु नगरी भवेद्विश्वस्तानां विलपनरवै र्नादितदिशा ॥ प ॥ २६ ॥

एवंब्रुवाणस्य समीरमूनोः वधं समाज्ञापय दाशरेन्द्रः ।

दूता नवध्या भुवनेषु वीरैः इति न्यषेधीत्तमथो विभीषणः ॥ प ॥ २७

पटैस्संवेष्टय तैलेन सिक्त्वा संयुज्य वह्निना ।

वालमस्य दशग्रीवः कारयामास घोषणाम् ॥ प ॥ २८ ॥

विदितवृत्तान्तया नितान्ततान्तया धरासुतया यद्यप्यहं पतिव्रता भवशीतोहनूमतः इति शापितं निजलूमलोमापि, अदहन्तं शिखावन्तमवेक्ष्य शाखामृगवरिष्ठः प्रहृष्टमना निच्छिद्य बंधा न्निष्पिष्य घोषयतो निशाचरा न्भस्मीकृत्य कृष्णवर्त्मना तेनैव लङ्कां प्रणम्य जानकीं निस्तीर्य जलधिमानंदयामास सीतोदंतकथनेन जांबवदादी न्वाहिनीपतिन् ॥ ग ॥ २९ ॥

तृतीयमञ्जरी—(*Continued*).

तत उच्छ्रितलांगूलाः प्लवगेशाः प्रतस्थिरे ।
प्रवृत्तिमेतां सीतायाः रामायाशु विवक्षवः ॥ प ॥ ३० ॥

पथिस्थितं मधुवनं सुग्रीवस्य वलीमुखाः ।
प्रविश्य मारुत्यादेशात्पपु र्मधु पिपासिताः ॥ प ॥ ३१ ॥

अमी च तत्रात्मनो निवारयन्तं वनपालं दधिमुखं भ्रूदंतजिह्वादि निजावयव दर्शनादिना परिहासेन दन्तै र्दशनेन नखै र्विदारणेन पाणिभ्यां चपेटाप्रदानेन पादैराघातेन दंडैस्ताडनेन वृक्षैः प्रहारेण गंडोपलैः पिंडीकरणेनच तं कांदिशीकं विधाय सत्वरं प्रधाव्य सलक्ष्मणसुग्रीवं राघव महमहमिकया प्रणेमुः ॥ ग ॥ ३२ ॥

सीताप्रवृत्ति विज्ञाप्य राघवायांजनात्मजः ।
सर्वस्वदानसदृशं रामालिंगन मन्वभूत् ॥ प ॥ ३३ ॥

इतिसुन्दरकाण्डः ॥

अथ निशाचरनाथ पुरास्थितां जनकजामवकर्ण्य रघूद्वहः ।
स समलोकत तूणयुगं धनुः प्रळय पावक दाहिकया दृशा ॥ प ॥ १ ॥

अथ सुग्रीव निदेश प्रचलितं आंजनेय तारेय समारूढ रामलक्ष्मण निरीक्षण द्विगुणित रणोत्साहं प्लवङ्गमर्क्ष गोलाङ्गूल बलमुत्प्लवनेनैव विलंघितनगनदीविपिनं उदधिवेलानिलमनोहरे महेन्द्रशिखरकान्तारे फलमधूपहारेणाध्वश्रम मपानयत् ॥ ग ॥ २ ॥

तृतीयमञ्जरी—(*Continued*).

तदनु दशमुख श्चारमुखा दजेयमागतं प्लवङ्गमबल माकर्ण्य किंकर्तव्यतामूढः प्रहस्तमुखमंत्रिसंधुक्षितायोधनोत्साहो हितैषिणं राघवाय सीतासमर्पण मुपदिशन्त मनुजं विभीषणं सदासि धिक्कृत्य निस्सारयांबभूव ॥ ग ॥ ३ ॥

ततस्समागत्य पदोः पतन्तं । विभीषणं द्रागभिषिच्य राज्ये ।
उपेक्षमाणं जलधिं निजार्थनां । धनंजयास्त्रेण ददाह राघवः ॥ प ॥ ४

पादयोः पतितेनाथ सिंधुना दर्शितेस्थले ।
कपिवीराहृतै श्शैलै र्नलं सेतुमचीकरत् ॥ प ॥ ५ ॥

अथ विलंघितसागरस्य प्रविष्टसुवेलाचलस्य वलीमुखबलस्य, परिमाणमवगन्तुमागताभ्यां कपिवरसंधानितप्रहृतमूर्छिताभ्यां दयाशरधिना दाशरधिना विमोचिताभ्यां शुकसारणाभ्यां विदितनिखिलवृत्तान्तो दशाननो विद्युज्जिह्वमुपह्वरे किमप्यकथयत् ॥ ग ॥ ६ ॥

मायाविना तेन पुरो विनिर्मितं निरीक्ष्य भर्तु स्सशिर श्शरासनं ।
मुमूर्छ सीता सरमा विभीषणप्रिया समाश्वासय दाप्तभाषणैः ॥ प ॥ ७ ॥

रामाय सीतांदिश रावणेति हितं ततोबोधयतिस्म माल्यवान् ।
रक्षोधिपस्तं परिहास्य सेनांरणाय सन्नाहवर्ती चकार ॥ प ॥ ८ ॥

पश्चाद्वानरवाहिनीप्रमथितां रक्षोधिपाक्षौहिणी मालोक्येन्द्रजिदाशुगान् प्रविकिरन्नप्यंगदेनाहतः ।

लीनोव्योमनि मायया नृपसुतौ बध्वोरगास्त्रैः पुरीं गत्वा तातमलोकयज्जनकजां दुःखार्णवेऽमज्जयत् ॥ प ॥ ९ ॥

तृतीयमञ्जरी—(*Continued*).

अथ यदृच्छा समागत विनतासुत गरुद्वात निर्धूत वाताशनास्त्रौ राजपुत्रा ववलोक्याहवोत्साहवत्सु राक्षसेषु हनुमदंगदप्रभृतिभि र्निहतान्प्रहसनप्रभृतीन् वाहिनीपतीनवकर्ण्य रथाधिरूढो जगद्भयंकरेणाकारेण साकमनीकाय समादिकत रावणः ॥ ग ॥ १० ॥

सालान् गिरींश्चनुदतीं कपिवीरसेनां उत्सार्य बाणनिवहै र्भुविलक्ष्मणंसः।

शक्त्या निपात्य रघुनायकसायकौघैः प्राणावशेषिततनुः नगरींदुधाव ॥ प ॥ ११ ॥

कुंभकर्णमथजन्यभूगतं भक्षयन्तमखिलान्वलीमुखान् ।

भूसुतापतिरसूदयत्ततः पुष्पवृष्टिमकरोत्सुरव्रजः ॥ प ॥ १२ ॥

सुरांतक नरांतक प्रभृति राक्षसानीकिनी पतिष्वनिल पाकशासनि सुतादिभि स्संयुगे ।

हतेषु पुरुहूतजिद्धनुमदक्ष सेनापतीन्विहाय सह रामलक्ष्मणममूर्छयद्वाहिनीं ॥ प ॥ १३ ॥

ऋक्षाधिपनियोगेन वेगेन पवनात्मजः ।

संजीविनीलताधारं आनयामास भूधरं ॥ प ॥ १४ ॥

संजीविनीगिरि समीर समुच्छ्वसद्भिः शाखामृगैः कलुषितां नगरीं विहाय ।

युद्धाय संगतवतो मकराक्षकुंभपूर्वान्रघूत्तम कपीशमुखा निजघ्नुः ॥ प ॥ १५ ॥

पुनर्दशमुखात्मजो गगनलीनएवाद्भुगान् प्रवर्ष्य भरताग्रजक्रुधमवेत्य लंकांगतः प्रतीचि पुरतोरणे हनुमतः पुरः पश्यतश्च कर्त जनकात्मजां ककचकेन मायामयीं ॥ ग ॥ १६ ॥

तृतीयमञ्जरी—(*Continued*).

तस्मिन्निराशेरघुनायकांतिकंगंतर्ययंप्राप्यानिकुंभिलांमखं ।
आरब्धवान्राघवलक्ष्मणौततः सीताशुचातीवतरां विषेदतुः ॥ प॥ १७॥

विभीषणाश्वासितराघवाज्ञया गतैर्हनूमत्प्रमुखै र्वलीमुखैः ।
विनाशिते कर्मणि रोषनिर्भराः समाययुश्छक्रजयी रणांगणं ॥ प॥ १८

तत्स्यन्दनोन्नततरे पवनात्मजस्य स्कन्धेनिविश्य विनिपात्य शराननेकान्।
सौमित्रिरच्छिनदमुष्य शिरश्शरेण पौरंदरेण विबुधाः कुसुमान्यवर्षन्
॥ प ॥ १९ ॥

शक्रारैनिहते सुते दशमुखश्शोकाब्धिमग्नश्चिरं प्रेयस्याः प्रतिरोधमप्यगणय ल्लोकैकवीराग्रणीः ।
विश्वस्ता परिदेवना रव विनिर्भिन्नाखिलाशांचलां लंकां, प्रेक्ष्य रणांगणं द्विगुणितक्रोध स्समागात्ततः ॥ प ॥ २० ॥

कपीन्कृपाणेन विदारयन्नयं बभूव सौमित्रिशरैरनुच्छवसन् ।
प्रयुज्यशक्तिं भुवनैकभीषणां अयोजयल्लक्ष्मण मिन्द्रजिद्रिपुं ॥ प ॥ २१

संजीविनीमारुतजीवितानुजं समीक्ष्य हृष्टो रघुवंशवर्धनः ।
आखण्डलप्रेषित मुच्चवाजिनं समारुरोहाथ समातलिंरथं ॥ प ॥ २२

अथदशरथतनय दशवदनयोः वारुणविनि यारित वैश्वानरं, वैनतेयस मुत्सारित दांदशूकारिं, वातास्त्रविनिर्धूतजैमूतं, वैकर्तनविनिवर्तित तामिस्रं, वासवनिष्कासितदानवं, वासुदेवप्रचलायितवामदेवं, अंबरतलनिविष्टसुरमुनिप्रभृतिभिः अत्यादरेणावलोक्यमानमुदभूदभूतपूर्वमायोधनं ॥ ग ॥ २३ ॥

शिरस्सुलूनेष्वपिवैरिणस्ततः पुनः पुनः कंदळितेषुराघवः।
विधेः प्रयुज्यास्त्रमथज्वलच्छिखंजघानतंलोकविरोधिनंरणे ॥प॥ २४॥

तृतीयमञ्जरी——(*Continued*).

तदाविनेदुस्सुरभेरिका भृशं जगुः कलं नाकसदांकुशीलवाः ।
अनर्तिषुश्चारुसुरांगनास्सुराः रघूत्तमंकल्पसुमैरवाकिरन् ॥ प ॥ २५ ॥

त्रिलोकविख्यात महाभुजे मृते रिपावपि भ्रातरि राक्षसाधिपे ।
कृतात्मनिन्दो विललाप . मूर्छितो विभीषणो गद्गदभाषणस्ततः
॥ प ॥ २६ ॥

मंदोदरीप्रभृतयः रजनीचरयोषितः ।
विलेपुः पतिपुत्रादीन् विलोक्यगतजीवितान् ॥ प ॥ २७ ॥

परेतवर्गाय निवापपूर्विकाः क्रियावितन्वंत ममुं विभीषणं ।
विधाय लंकाधिपतिं प्रवेशनात् पवित्रिताग्निं जगृहे स जानकीम्
॥ प ॥ २८ ॥

सहप्लवगै राधिरुह्य पुष्पकं विमानमुर्वीतनयांप्रति प्रभुः ।
समुद्ररोधश्शयनादिकाः कथाः वदन् भरद्वाजतपोवनं ययौ ॥ प ॥ २९

तथातिथेयं प्रतिगृह्य नागरैः प्रमोदमानै र्भरताग्रगामिभिः ।
वियुक्तवत्साभि नवप्रसूतिका गवीसदृक्षाभिरपि स्वमातृभिः ॥ प ॥ ३०

वसिष्ठपूर्वैर्मुनिभिर्नदीजलप्रपूर्णसौवर्ण घटीकरैरपि ।
अभिप्रयातः पटहादिनादितं विवेश साकेतपुरं रघूद्वहः ॥ प ॥ ३१ ॥

ततश्चतुस्सागरवारिपूर्णैः सुवर्णकुंभै स्सहजानिमेनं ।
हिरण्यपट्टामबबध्यफाले वसिष्ठपूर्वा मुनयोऽभ्यषिंचन् ॥ प ॥ ३२ ॥

अथारुह्य भद्रासनं रामभद्रः किरीटंकुलायात मादायमूर्ध्नि ।
स सम्मानयामाससम्मानर्नीयान् । मुनीशा न्महीशा न्कवीशा
न्कपीशान् ॥ प ॥ ३३ ॥

इतियुद्धकाण्डः ॥

तृतीयमञ्जरी——(*Continued.*)

सुग्रीवप्रमुखान् सखीन् जनपदे स्वे स्वे प्रतिष्ठापयन् पुत्रौप्राप्यगुणाधिकौ कुशलवा वानन्दपूर्णान्तरः ।

नित्यंसादरमाश्रितस्सतनुजै र्लोकोत्तरैर्भा तृभि र्मातणां मुदमावहन्समकरोद्राज्यंहि निष्कण्टकम् ॥ प ॥

इतिउत्तरकाण्डः

समाप्तम्.

CHAPTER VI—*A*.

संख्यावाचकशब्दाः । CARDINALS

एकः	द्वाविंशतिः	त्रिचत्वारिंशत्	चतुष्षष्टिः
द्वौ	त्रयोविंशतिः	चतुश्चत्वारिंशत्	पञ्चषष्टिः
त्रयः	चतुर्विंशतिः	पञ्चचत्वारिंशत्	षट्षष्टिः
चत्वारः	पञ्चविंशतिः	षट्चत्वारिंशत्	सप्तषष्टिः
पञ्च	षड्विंशतिः	सप्तचत्वारिंशत्	अष्टषष्टिः
षट्	सप्तविंशतिः	अष्टचत्वारिंशत्	एकोनसप्ततिः
सप्त	अष्टविंशतिः	एकोनपञ्चाशत्	सप्ततिः
अष्ट	एकोनत्रिंशत्	पञ्चाशत्	एकसप्ततिः
नव	त्रिंशत्	एकपञ्चाशत्	द्विसप्ततिः
दश	एकत्रिंशत्	द्विपञ्चाशत्	त्रिसप्ततिः
एकादश	द्वात्रिंशत्	त्रिपञ्चाशत्	चतुस्सप्ततिः
द्वादश	त्रयस्त्रिंशत्	चतुष्पञ्चाशत्	पञ्चसप्ततिः
त्रयोदश	चतुस्त्रिंशत्	पञ्चपञ्चाशत्	षट्सप्ततिः
चतुर्दश	पञ्चत्रिंशत्	षट्पञ्चाशत्	सप्तसप्ततिः
पञ्चदश	षट्त्रिंशत्	सप्तपञ्चाशत्	अष्टसप्ततिः
षोडश	सप्तत्रिंशत्	अष्टपञ्चाशत्	एकोनाशीतिः
सप्तदश	अष्टत्रिंशत्	एकोनषष्टिः	अशीतिः
अष्टादश	एकोनचत्वारिंशत्	षष्टिः	एकाशीतिः
एकोनविंशतिः	चत्वारिंशत्	एकषष्टिः	द्व्यशीतिः
विंशतिः	एकचत्वारिंशत्	द्विषष्टिः	त्र्यशीतिः
एकविंशतिः	द्विचत्वारिंशत्	त्रिषष्टिः	चतुरशीतिः

संख्यावाचकशब्दाः——(*Concluded*).

पञ्चाशीतिः	द्विनवतिः	एकोनशतम्	सप्तशतं
षडशीतिः	त्रिनवतिः	शतम्	अष्टशतं
सप्ताशीतिः	चतुर्नवतिः	द्विशतम्	नवशतं
अष्टाशीतिः	पञ्चनवतिः	त्रिशतं	सहस्रं
एकोननवतिः	षण्णवतिः	चतुश्शतं	अयुतं
नवतिः	सप्तनवतिः	पञ्चशतं	लक्षम्
एकनवतिः	अष्टनवतिः	षट्शतं	

CHAPTER VI—*B*.

॥ संख्येयवाचकाः ॥

NUMERALS (ORDINALS)

१	प्रथमः	१२	द्वादशः	२४	चतुर्विंशः
२	द्वितीयः	१३	त्रयोदशः	२५	पञ्चविंशः
३	तृतीयः	१४	चतुर्दशः	२६	षड्विंशः
४	चतुर्थः तुरीयः—तुर्यः	१५	पञ्चदशः	२७	सप्तविंशः
		१६	षोडशः	२८	अष्टविंशः
५	पञ्चमः	१७	सप्तदशः	२९	एकोनत्रिंशः
६	षष्ठः	१८	अष्टादशः	३०	त्रिंशः
७	सप्तमः	१९	एकोनविंशः	३१	एकत्रिंशः
८	अष्टमः	२०	विंशः	३२	द्वात्रिंशः
९	नवमः	२१	एकविंशः	३३	त्रयस्त्रिंशः
१०	दशमः	२२	द्वाविंशः	३४	चतुस्त्रिंशः
११	एकादशः	२३	त्रयोविंशः	३५	पञ्चत्रिंशः

संख्येयवाचकाः——(*Continued*).

३६ षट्त्रिंशः
३७ सप्तत्रिंशः
३८ अष्टत्रिंशः
३९ एकोनचत्वारिंशः
४० चत्वारिंशः
४१ एकचत्वारिंशः
४२ द्विचत्वारिंशः, द्वाचत्वारिंशः
४३ त्रिचत्वारिंशः, त्रयश्चत्वारिंशः
४४ चतुश्चत्वारिंशः
४५ पञ्चचत्वारिंशः
४६ षट्चत्वारिंशः
४७ सप्तचत्वारिंशः
४८ अष्टचत्वारिंशः, अष्टाचत्वारिंशः
४९ एकोनपञ्चाशः
५० पञ्चाशः
५१ एकपञ्चाशः
५२ द्विपञ्चाशः, द्वापञ्चाशः
५३ त्रिपञ्चाशः, त्रयःपञ्चाशः
५४ चतुःपञ्चाशः
५५ पञ्चपञ्चाशः
५६ षट्पञ्चाशः
५७ सप्तपञ्चाशः
५८ अष्टपञ्चाशः, अष्टापञ्चाशः
५९ एकोनषष्टितमः
६० षष्टितमः
६१ एकषष्टितमः
६२ द्विषष्टितमः, द्वाषष्टितमः
६३ त्रिषष्टितमः, त्रयष्षष्टितमः
६४ चतुष्षष्टितमः
६५ पञ्चषष्टितमः
६६ षट्षष्टितमः
६७ सप्तषष्टितमः
६८ अष्टषष्टितमः, अष्टाषष्टितमः
६९ एकोनसप्ततितमः
७० सप्ततितमः
७१ एकसप्ततितमः
७२ द्विसप्ततितमः, द्वासप्ततितमः
७३ त्रिसप्ततितमः, त्रयस्सप्ततितमः
७४ चतुस्सप्ततितमः
७५ पञ्चसप्ततितमः
७६ षट्सप्ततितमः
७७ सप्तसप्ततितमः
७८ अष्टसप्ततितमः, अष्टासप्ततितमः
७९ एकोनाशीतितमः
८० अशीतितमः
८१ एकाशीतितमः
८२ द्व्यशीतितमः, द्वाशीतितमः
८३ त्र्यशीतितमः, त्रयोशीतितमः
८४ चतुरशीतितमः
८५ पञ्चाशीतितमः
८६ षडशीतितमः
८७ सप्ताशीतितमः
८८ अष्टाशीतितमः
८९ एकोननवतितमः
९० नवतितमः
९१ एकनवतितमः
९२ द्विनवतितमः, द्वानवतितमः
९३ त्रिनवतितमः, त्रयोनवतितमः
९४ चतुर्नवतितमः
९५ पञ्चनवतितमः
९६ षण्णवतितमः
९७ सप्तनवतितमः

संख्येयवाचकाः——(*Concluded*).

९८	अष्टनवतितमः अष्टानवतितमः	९०८ अष्टोत्तरशततमः	११५ पञ्चदशोत्तर-शततमः
९९	एकोनशततमः	१०९ नवोत्तरशततमः	११६ षोडशोत्तरशततमः
१००	शततमः	११० दशोत्तरशततमः	११७ सप्तदशोत्तर-शततमः
१०१	एकोत्तरशततमः	१११ एकादशोत्तर-शततमः	११८ अष्टादशोत्तर-शततमः
१०२	द्व्युत्तरशततमः	११२ द्वादशोत्तरशततमः	११९ एकोनविंशत्युत्तर-शततमः
१०३	त्र्युत्तरशततमः	११३ त्रयोदशोत्तर-शततमः	१२० विंशत्युत्तरशततमः
१०४	चतुरुत्तरशततमः	११४ चतुर्दशोत्तर-शततमः	एवमेवानुमेयम्
१०५	पञ्चोत्तरशततमः		
१०६	षडुत्तरशततमः		
१०७	सप्तोत्तरशततमः		

CHAPTER VII—*A*.

प्रयोगाः ।

VOICES.

1. अकर्मकप्रयोगः = Intransitive.—नारायणः प्रकाशते ।

2. सकर्मकप्रयोग. = Transitive.—आचार्यः शिष्यम् अनुगृह्णाति ।

3. द्विकर्मकप्रयोगः = Verbs governing two objects.—वामनो बलि वसुधांयाचते

4. कर्मणि प्रयोगः = Passive.—आचार्येण शिष्यः अनुगृह्यते.

5. भावे प्रयोगः = Impersonal use of verbs.—वरुणेन भूयते.

6. द्विकर्मकर्माणि प्रयोगः = Passive of transitive verbs with two objects.—वामनेन बलिः बसुधांयाच्यते ।

CHAPTER VII—*B*.

॥ कर्मणिलकारप्रकरणम् ॥

PASSIVE VOICE.

(For a fuller treatment of the subject see chapter V, part II).

१. सार्वधातुकेयक् ॥

भावेकर्मणिचधातोः परतः यक्प्रत्ययः स्यात् सार्वधातुकेपरे

In the conjugational tenses, the Passive and Impersonal forms of verbs are formed by affixing य to the roots before the terminations are added.

कर्मणिलकारप्रकरणम् —— *(Concluded).*

२. भावकर्मणोः ॥

भावेकर्मणिच आत्मनेपदं स्यात् ॥

In the Passive and the Impersonal use of verbs only Atmanepada terminations are added to roots भ् भूयते, त्यज् त्यज्यते.

३. अकृत्सार्वधातुकयोर्दीर्घः.

धात्वन्त्याः इकाराः उकाराश्चदीर्घाभवन्ति यकारादौप्रत्ययेपरे

The final इ and उ of roots are lengthened when followed by an affix beginning with य-जि जीयते, स्तु स्तूयते.

४. रिङ्-शयग्लिङ्-क्षु ॥

धात्वन्त्य ऋकारस्यस्थाने रि इत्यादेशोभवति ॥

The final ऋ of roots is changed to रि. कृ - क्रियते ॥

CHAPTER VII—*C.*

उपसर्गाः ।

UPASARGAS.

प्र, परा, अप, सम्, अनु, अव, निस्. निर्, दुस्, दुर् वि, आङ्, नि, अधि, अपि, अति, सु,उत्, अभि, प्रति, परि, उप, एते, प्रादयः ।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।

प्रहाराहारसंहारविहारपरिहारवत् ॥

उपसर्गाः——(*Concluded*).

The sense of roots is modified by the addition of Upasargas.

प्रहार	(from हृ with प्र)	= beating.
आहार	(from हृ, with आ)	= food.
संहार	(from हृ with सम्)	= killing.
विहार	(from हृ with वि)	= play.
परिहार	(from हृ with परि)	= remedy.
अनुगच्छति	(from गम् with अनु)	= follows.
अवगच्छति	(from गम् with अव)	= knows.
संलाप	(from लप् with सम्)	= pleasant conversation.
प्रलाप	(from लप् with प्र)	= prattle.
विलाप	(from लप् with वि)	= lament.
विप्रलाप	(from लप् with प्र & वि)	= speaking against.

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।

आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

अव, अपि, एतयोः उपसर्गयोः आद्याकारः लुप्यते हलन्तानां शब्दानां स्त्रियाम् आकारश्च अन्ते अनुषञ्जनीयः इति भागुरिराचार्यः मन्यते ।

Grammarian Bhaguri says that the initial अ of the prepositions अव and अपि is dropped, and that आ is to be affixed at the end of Feminine Gender words ending in a consonant.

Examples:—अवगाहः—वगाहः; अपिधानम्—पिधानम्; वाक्—वाचा; निट्—निशा; दिक्—दिशा ।

CHAPTER VII—*D.*

अकर्मकसकर्मकधातुविवरणम् ।

TRANSITIVE AND INTRANSITIVE.

" वृद्धिक्षयभयजीवितमरणं लज्जास्तास्थितिजागरणम् ।
कौटिल्यौत्सुक्यभ्रमयत्न ग्लानिजरासामर्थ्यक्षरणम् ॥

शान्तिध्वनिमज्जनवैकल्यं जृम्भणदम्भनरोदनहसनम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणन्तमकर्मकमाहुः ॥ '

प्रायेण अधोलिखितधातवः तत्समानार्थकधातवश्च अकर्मकाः इतरे तु सकर्मका इत्यवगन्तव्यम् ।

Generally, verbs, given below and those having the same sense as these, are non-object-bearing ones (*i.e.*), Intransitive in character, while the rest are object-bearing verbs (*i.e.*), Transitive ones.

ROOTS	FORMS.	MEANINGS
वृध्	वर्धते	Increases.
क्षि	क्षयति	Wastes.
भी	बिभेति	Is afraid.
जीव्	जीवति	Lives.
मृ	म्रियते	Dies.
लज्ज्	लज्जते	Is ashamed.
भू	भवति	Is.
स्था	तिष्ठति	Stands.
जागृ	जागर्ति	Awakes.
कुट्	कुटति	Is crooked.

अकर्मकसकर्मकधातुविवरणम्——(*Concluded*).

ROOTS	FORMS.	MEANINGS.
कठि	उत्कठते	Longs.
भ्रम्	भ्राम्यति	Roams about.
यत्	यतते	Strives.
ग्लै	ग्लायति	Is weary.
जॄ	जीर्यति	Becomes old.
क्लृप्	कल्पते	Is able.
च्युत्	च्योतति	Slips.
शम्	शाम्यति	Is calm.
ध्वन्	ध्वनति	Sounds.
मज्ज्	मज्जति	Sinks.
कद	कदते	Is void.
जृम्भ्	जृम्भते	Yawns.
दभि	दम्भयति	Is proud.
रुद्	रोदिति	Weeps or cries.
हस्	हसति	Laughs.
शी	शेते	Lies.
क्रीड	क्रीडति	Plays.
रुच्	रोचते	Looks beautiful.
इन्ध्	इन्धते	Is bright.

CHAPTER VIII.

॥ सुबन्तरूपाणि ॥

THE DECLENSION OF SANSKRIT NOUNS

1. स्वौजसमौट् छष्टाभ्याम्भिस् ङेभ्यांभ्यस् ङसिभ्यांभ्यस् ङसोसाम् ङयोस् सुप्. 2. विभक्तिश्च. 3. सुपः. 4. द्वेकयोर्द्विवचनैकवचने. 5. बहुषु-बहुवचनम् ।

एकवचनम्. Singular.	द्विवचनम्. Dual	बहुवचनम्. Plural.		
सु (स्)	औ	जस् (अस्)	प्रथमाविभक्ति संबोधन प्रथमाविभक्तिः	Nominative case. Vocative case.
अम्	औट्(औ)	शस्(अस)	द्वितीया विभक्तिः	Accusative case.
टा(आ)	भ्याम्	भिस्	तृतीया विभक्तिः	Instrumental case.
ङे (ए)	भ्याम्	भ्यस्	चतुर्थी विभक्तिः	Dative case.
ङसि(अस्)	भ्याम्	भ्यस्	पञ्चमी विभक्तिः	Ablative case.
ङस्(अस्)	ओस	आम्	षष्ठी विभक्तिः	Genitive case.
ङि (इ)	ओस	सुप् (सु)	सप्तमी विभक्तिः	Locative case.

Masculine gender.	Femenine gender.	Neuter gender.
पुल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्

एते प्रत्ययाः सुप इत्युच्यन्ते एतदन्तानि प्रातिपदिकानि सुबन्तानीति कथ्यन्ते तेषु प्रत्ययेषु केचित् विविधेभ्यः प्रातिपदिकेभ्यः रूपान्तराणि प्रतिपद्यन्ते लिङ्गभेदे च भिद्यन्ते गेर्वाण्यां भाषायाम् प्रायशः लिङ्गानि अमरकोशादेभ्यः वेद्यानि नत्वर्थनिबन्धनानि ।

These are the suffixes used for the declension of noun bases. Of these some undergo changes in relation to the bases to which they are added and some vary in regard to the genders of bases.

In Sanskrit gender generally does not depend upon sex and therefore the genders of bases have to be learnt mainly from lexicons like Amarakosa &c.

Examples :—

अकारान्तः पुल्लिङ्गो 'राम' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा.	रामः	रामौ	रामाः
द्वितीया.	रामम्	रामौ	रामान्
तृतीया.	रामेण	रामाभ्याम्	रामैः
चतुर्थी.	रामाय	रामाभ्याम्	रामेभ्यः
पञ्चमी.	रामात्	रामाभ्याम्	रामेभ्यः
षष्ठी.	रामस्य	रामयोः	रामाणाम्
सप्तमी.	रामे	रामयोः	रामेषु
सम्बोधनम्.	हे राम	हे रामौ	हे रामाः

एवं कृष्ण, मुकुन्दादयः ।

(२) इकारान्तः पुल्लिङ्गो 'हरि' शब्दः ।

प्र.	हरिः	हरी	हरयः
द्वि.	हरिं	हरी	हरीन्
तृ.	हरिणा	हरिभ्याम्	हरिभिः
च.	हरये	हरिभ्याम्	हरिंभ्यः
पं	हरेः	हरिभ्याम्	हरिभ्यः

'हरि' शब्दः——(*Concluded*).

	एकवचनम्	द्विवचनम्	बहुवचनम्
ष.	हरेः	हर्योः	हरीणाम्
स.	हरौ	हर्योः	हरिषु
सः	हे हरे	हे हरी	हे हरयः

एवं श्रीपति, अग्नि, रवि, कव्यादय ।

(३) इकारान्तः पुल्लिङ्गः 'पति' शब्दः ।

प्र.	पतिः	पती	पतयः
द्वि.	पतिं	पती	पतीन्
तृ.	पत्या	पतिभ्याम्	पतिभिः
च.	पत्ये	पतिभ्याम्	पतिभ्यः
पं.	पत्युः	पतिभ्याम्	पतिभ्यः
ष.	पत्युः	पत्योः	पतीनाम्
स.	पत्यौ	पत्योः	पतिषु
सं	हे पते	हे पती	हे पतयः

(४) इकारान्तः पुल्लिङ्गः 'सखि' शब्दः ।

प्र.	सखा	सखायौ	सखायः
द्वि.	सखायम्	सखायौ	सखीन्
तृ.	सख्या	सखिभ्याम्	सखिभिः
च.	सख्ये	सखिभ्याम्	सखिभ्यः
पं.	सख्युः	सखिभ्याम्	सखिभ्यः
ष.	सख्युः	सख्योः	सखीनाम्
स.	सख्यौ	सख्योः	सखिषु
सं.	हे सखे	हे सखायौ	हे सखायः

(५) उकारान्तः पुल्लिङ्गो 'गुरु' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	गुरुः	गुरू	गुरवः
द्वि.	गुरुम्	गुरू	गुरून्
तृ.	गुरुणा	गुरुभ्याम्	गुरुभिः
च.	गुरवे	गुरुभ्याम्	गुरुभ्यः
पं.	गुरोः	गुरुभ्याम्	गुरुभ्यः
ष.	गुरोः	गुर्वोः	गुरूणाम्
स.	गुरौ	गुर्वोः	गुरुषु
सं.	हे गुरो	हे गुरू	हे गुरवः

एवं विष्णु, वायु, भान्वादयः ।

(६) ऊकारान्तः पुल्लिङ्गः 'स्वभू' शब्दः ।

प्र.	स्वभूः	स्वभुवौ	स्वभुवः
द्वि.	स्वभुवम्	स्वभुवौ	स्वभुवः
तृ.	स्वभुवा	स्वभूभ्याम्	स्वभ्भिः
च.	स्वभुवे	स्वभूभ्याम्	स्वभूभ्यः
पं.	स्वभुवः	स्वभूभ्याम्	स्वभूभ्यः
ष.	स्वभुवः	स्वभुवोः	स्वभुवाम्
स.	स्वभुवि	स्वभुवोः	स्वभूषु
सं.	हे स्वभूः	हे स्वभुवौ	हे स्वभुवः

एवं कटप्रू, स्वयंभू, प्रभृतयः ।

(७) ऋकारान्तः पुल्लिङ्गो 'धातृ' शब्दः

प्र.	धाता	धातारौ	धातारः
द्वि.	धातारम्	धातारौ	धातॄन्

'धातृ' शब्दः—(*Concluded*).

	एकवचनम	द्विवचनम	बहुवचनम
तृ.	धात्रा	धातृभ्याम्	धातृभिः
च.	धात्रे	धातृभ्याम्	धातृभ्यः
पं.	धातुः	धातृभ्याम्	धातृभ्यः
ष.	धातुः	धात्रोः	धातॄणाम्
स.	धातरि	धात्रोः	धातृषु
सं.	हे धातः	हे धातारौ	हे धातारः

एवं नष्तृ, शास्तृ, कर्तृ, इत्यादयः ।

(८) ऋकारान्तः पुल्लिङ्गो 'नृ' शब्दः

प्र.	ना	नरौ	नरः
द्वि.	नरम्	नरौ	नॄन्
तृ.	न्रा	नृभ्याम्	नृभिः
च.	न्रे	नृभ्याम्	नृभ्यः
पं.	नुः	नृभ्याम्	नृभ्यः
ष.	नुः	न्रोः	नृणाम् नॄणाम्
स.	नरि	न्रोः	नृषु

(९) ऋकारान्तः पुल्लिङ्गः 'पितृ' शब्दः

प्र.	पिता	पितरौ	पितरः
द्वि.	पितरम्	पितरौ	पितॄन्
सं	हे पितः	हे पितरौ	हे पितरः

शेषं धातृ (७) शब्दवत् ।

एवं जामातृ, भ्रातृ, देवृ, शंस्तृ, सव्येष्टृ, शब्दाः ।

(१०) ऐकारान्तः पुल्लिङ्गो 'रै' शब्दः।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	राः	रायौ	रायः
द्वि.	रायम्	रायौ	रायः
तृ.	राया	राभ्याम्	राभिः
च.	राये	राभ्याम्	राभ्यः
पं	रायः	राभ्याम्	राभ्यः
ष.	रायः	रायोः	रायाम्
स.	रायि	रायोः	रासु

(११) ओकारान्तः पुल्लिङ्गो 'गो' शब्दः।

प्र. सं.	गौः	गावौ	गावः
द्वि.	गाम्	गावौ	गाः
तृ.	गवा	गोभ्याम्	गोभिः
च.	गवे	गोभ्याम्	गोभ्यः
पं.	गोः	गोभ्याम्	गोभ्यः
ष.	गोः	गवोः	गवाम्
स.	गवि	गवोः	गोषु

(१२) औकारान्तः पुल्लिङ्गो 'ग्लौ' शब्दः।

प्र. सं	ग्लौः	ग्लावौ	ग्लावः
द्वि.	ग्लावम्	ग्लावौ	ग्लावः
तृ.	ग्लावा	ग्लौभ्याम्	ग्लौभिः
च.	ग्लावे	ग्लौभ्याम्	ग्लौभ्यः
पं.	ग्लावः	ग्लौभ्याम्	ग्लौभ्यः
ष.	ग्लावः	ग्लावोः	ग्लावाम्
सं.	ग्लावि	ग्लावोः	ग्लौषु

इत्यजन्ता पुल्लिङ्गाः।

अथाजन्तस्त्रीलिङ्गसाधारणशब्दाः ।

---

(१३) आकारान्तः स्त्रीलिङ्गो 'रमा' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	रमा	रमे	रमाः
द्वि.	रमाम्	रमे	रमाः
तृ.	रमया	रमाभ्याम्	रमाभिः
च.	रमायै	रमाभ्याम्	रमाभ्यः
पं.	रमायाः	रमाभ्याम्	रमाभ्यः
ष.	रमायाः	रमयोः	रमाणाम्
स.	रमायाम्	रमयोः	रमासु
सं.	हे रमे	हे रमे	हे रमाः

एवं सीता, दुर्गा, क्षमा, इत्यादयः ।

(१४) इकारान्तः स्त्रीलिङ्गो 'मति' शब्दः ।

प्र.	मतिः	मती	मतयः
द्वि.	मतिम्	मती	मतीः
तृ.	मत्या	मतिभ्याम्	मतिभिः
च.	मत्यै, मतये	मतिभ्याम्	मतिभ्यः
पं.	मत्याः, मतेः	मतिभ्याम्	मतिभ्यः
ष.	मत्याः, मतेः	मत्योः	मतीनाम्
स.	मत्याम्, मतौ	मत्योः	मतिषु
सं	हे मते	हे मती	हे मतयः

एवं श्रुति, स्मृति, बुद्धि इत्यादयः

(१५) ईकारान्तः स्त्रीलिङ्गो 'गौरी' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	गौरी	गौर्यौ	गौर्यः
द्वि.	गौरीम्	गौर्यौ	गौरीः
तृ.	गौर्या	गौरीभ्याम्	गौरीभिः
च.	गौर्यै	गौरीभ्याम्	गौरीभ्यः
पं.	गौर्याः	गौरीभ्याम्	गौरीभ्यः
ष.	गौर्याः	गौर्योः	गौरीणाम्
स.	गौर्याम्	गौर्योः	गौरीषु
सं.	हे गौरि	हे गौर्यौ	हे गौर्यः

(१६) ईकारान्तः स्त्रीलिङ्गः 'स्त्री' शब्दः ।

प्र.	स्त्री	स्त्रियौ	स्त्रियः
द्वि.	स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः
तृ.	स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च.	स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः
पं.	स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः
ष.	स्त्रियाः	स्त्रियोः	स्त्रीणाम्
स.	स्त्रियाम्	स्त्रियोः	स्त्रीषु
सं.	हे स्त्रि	हे स्त्रियौ	हे स्त्रियः

(१७) ईकारान्तः स्त्रीलिङ्गः 'श्री' शब्दः ।

प्र. स.	श्रीः	श्रियौ	श्रियः
द्वि.	श्रियम्	श्रियौ	श्रियः
तृ.	श्रिया	श्रीभ्याम्	श्रीभिः

'श्री' शब्दः——(*Concluded*).

	एकवचनम्	द्विवचनम्	बहुवचनम्
च.	श्रियै, श्रिये	श्रीभ्याम्	श्रीभ्यः
पं.	श्रियाः, श्रियः	श्रीभ्याम्	श्रीभ्यः
ष.	श्रियाः, श्रियः	श्रियोः	श्रीणाम्, श्रियाम
स.	श्रियाम्, श्रियि	श्रियोः	श्रीषु

एवं धी, ह्री, भी, इत्यादय. ।

(१८) उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः ।

प्र.	धेनुः	धेनू	धेनवः
द्वि.	धेनुम्	धेनू	धेनूः
तृ.	धेन्वा	धेनुभ्याम्	धेनुभिः
च.	धेन्वै, धेनवे	धेनुभ्याम्	धेनुभ्यः
पं	धेन्वाः, धेनोः	धेनुभ्याम्	धेनुभ्यः
ष.	धेन्वाः, धेनोः	धेन्वोः	धेनूनाम्
स.	धेन्वाम्, धेनौ	धेन्वोः	धेनुषु
सं.	हे धेनो	हे धेनू	हे धेनवः

एवं रज्जु, तनु, इत्यादय. ।

(१९) ऊकारान्तः स्त्रीलिङ्गो 'वधू' शब्दः ।

प्र.	वधूः	वध्वौ	वध्वः
द्वि.	वधूम्	वध्वौ	वधूः
तृ.	वध्वा	वधूभ्याम्	वधूभिः
च.	वध्वै	वधूभ्याम	वधूभ्यः
पं.	वध्वाः	वधूभ्याम्	वधूभ्यः

'वधू' शब्दः —(*Concluded*).

	एकवचनम्	द्विवचनम्	बहुवचनम्
ष.	वध्वाः	वध्वोः	वधूनाम्
स.	वध्वाम्	वध्वोः	वधूषु
सं.	हे वधु	हे वध्वौ	हे वध्वः

एवं चमू . श्वश्रू. जम्बू इत्यादयः।

(२०) ऊकारान्तः स्त्रीलिङ्गो 'भ्रू' शब्दः।

प्र.	भ्रूः	भ्रुवौ	भ्रुवः
द्वि.	भ्रुवम्	भ्रुवौ	भ्रुवः
तृ.	भ्रुवा	भ्रूभ्याम्	भ्रूभिः
च.	भ्रुवै, भ्रुवे	भ्रूभ्याम्	भ्रूभ्यः
पं.	भ्रुवाः, भ्रुवः	भ्रूभ्याम्	भ्रूभ्यः
ष.	भ्रुवाः, भ्रुवः	भ्रुवोः	भ्रूणाम्
स.	भ्रुवाम्, भ्रुवि	भ्रुवोः	भ्रूषु
सं.	हे भ्रूः	हे भ्रुवौ	हे भ्रुवः

एव भू, सुभ्रू इत्यादयः।

(२१) ऋकारान्तः स्त्रीलिङ्गो 'मातृ' शब्दः।

प्र.	माता	मातरौ	मातरः
द्वि.	मातरम्	मातरौ	मातॄः
सं.	हे मातः	हे मातरौ	हे मातरः

शेषं धातृ (७) शब्दवत्।

एवं दुहितृ, यातृ, ननान्दृ, शब्दाः।

(२२) ऋकारान्तः स्त्रीलिङ्गः 'स्वसृ' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	स्वसा	स्वसारौ	स्वसारः
द्वि.	स्वसारम्	स्वसारौ	स्वसॄः
सं	हे स्वसः	हे स्वसारौ	हे स्वसारः

शेषं धातृ, (७) शब्दवत्

(२३) ओकारान्तः स्त्रीलिङ्गो 'द्यो' शब्दः ।

प्र.	द्यौः	द्यावौ	द्यावः

इत्यादि गो (१०) शब्दवत्

(२४) औकारान्तः स्त्रीलिङ्गो 'नौ' शब्दः ।

प्र.	नौः	नावौ	नावः

इत्यादि ग्लौ (१०) शब्दवत्

इत्यजन्ताः स्त्रीलिङ्गा

अथाजन्तनपुंसकलिङ्गसाधारणशब्दाः ।

---

(२५) अकारान्त नपुंसकलिङ्गो 'ज्ञान' शब्दः

प्र.	ज्ञानम्	ज्ञाने	ज्ञानानि
द्वि.	ज्ञानम्	ज्ञाने	ज्ञानानि
सं.	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि

शेषं राम (१) शब्दवत् ।

(२६) इकारान्त नपुंसकलिङ्गो 'वारि' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	वारि	वारिणी	वारीणि
द्वि.	वारि	वारिणी	वारीणि
तृ.	वारिणा	वारिभ्याम्	वारिभिः
च.	वारिणे	वारिभ्याम्	वारिभ्यः
पं.	वारिणः	वारिभ्याम्	वारिभ्यः
ष.	वारिणः	वारिणोः	वारीणाम्
स.	वारिणि	वारिणोः	वारिषु
सं.	हे वारि, हे वारे	हे वारिणी	हे वारीणि

(२७) इकारान्त नपुंसकलिङ्गः 'दधि' शब्दः ।

प्र.	दधि	दधिनी	दधीनि
द्वि.	दधि	दधिनी	दधीनि
तृ.	दध्ना	दधिभ्याम्	दधिभिः
च.	दध्ने	दधिभ्याम्	दधिभ्यः
पं.	दध्नः	दधिभ्याम्	दधिभ्यः
ष.	दध्नः	दध्नोः	दध्नाम्
स.	दध्नि, दधनि,	दध्नोः	दधिषु
सं	हे दधे, हे दधि	हे दधिनी	हे दधीनि

एवं अस्थि, सक्थि, अक्षि, शब्दाः ।

(२८) उकारान्त नपुंसकलिङ्गो 'मधु' शब्दः ।

प्र.	मधु	मधुनी	मधूनि
द्वि.	मधु	मधुनी	मधूनि

'मधु' शब्दः——(Concluded)

	एकवचनम्	द्विवचनम	बहुवचनम्
तृ.	मधुना	मधुभ्याम्	मधुभिः
चं.	मधुने	मधुभ्याम्	मधुभ्यः
पं.	मधुनः	मधुभ्थाम्	मधुभ्यः
ष.	मधुनः	मधुनोः	मधूनाम्
स.	मधुनि	मधुनोः	मधुषु
सं.	हे मधो, हे मधु	हे मधुनौ	हे मधूनि

एवं वसु, वस्तु, जतु, अश्रु इत्यादयः ।

अथ हलन्तपुल्लिङ्गसाधारणशब्दाः ।

(२९) चकारान्तः पुल्लिङ्गः 'पयोमुच्' शब्दः ।

प्र. सं.	पयोमुक्	पयोमुचौ	पयोमुचः
द्वि.	पयोमुचम्	पयोमुचौ	पयोमुचः
तृ.	पयोमुचा	पयोमुग्भ्याम्	पयोमुग्भिः
च.	पयोमुचे	पयोमुग्भ्याम्	पयोमुग्भ्यः
पं.	पयोमुचः	पयोमुग्भ्याम्	पयोमुग्भ्यः
ष.	पयोमुचः	पयोमुचोः	पयोमुचाम्
स.	पयोमुचि	पयोमुचोः	पयोमुक्षु

(३०) जकारान्तः पुल्लिङ्गो 'भिषज्' शब्दः ।

प्र.	भिषक्	भिषजौ	भिषजः
द्वि.	भिषजम्	भिषजौ	भिषजः

भिषज् शब्दः — (Continued)

	एकवचनम्	द्विवचनम	बहुवचनन्
तृ.	भिषजा	भिषग्भ्याम्	भिषग्भिः
च.	भिषजे	भिषग्भ्याम्	भिषग्भ्यः
पं.	भिषजः	भिषग्भ्याम्	भिषग्भ्यः
ष.	भिषजः	भिषजोः	भिषजाम्
स.	भिषजि	भिषजोः	भिषक्षु

(३१) तकारान्तः पुल्लिङ्गो 'मरुत्' शब्दः ।

प्र. सं.	मरुत्	मरुतौ	मरुतः
द्वि.	मरुतम्	मरुतौ	मरुतः
तृ.	मरुता	मरुद्भ्याम्	मरुद्भिः
च.	मरुते	मरुद्भ्याम्	मरुद्भ्यः
पं.	मरुतः	मरुद्भ्याम्	मरुद्भ्यः
ष.	मरुतः	मरुतोः	मरुताम्
स.	मरुति	मरुतोः	मरुत्सु

एवं भूभृत्, हरित् इत्यादयः

(३२) तकारान्तः पुल्लिङ्गो 'धीमत्' शब्दः ।

प्र.	धीमान्	धीमन्तौ	धीमन्तः
द्वि.	धीमन्तम्	धीमन्तौ	धीमतः
तृ.	धीमता	धीमद्भ्याम्	धीमद्भिः
च.	धीमते	धीमद्भ्याम्	धीमद्भ्यः
पं.	धीमतः	धीमद्भ्याम	धीमद्भ्यः
ष.	धीमतः	धीमतोः	धीमताम्

धीमत् शब्दः—(*Concluded*.

	एकवचनम्	द्विवचनम्	बहुवचनम्
स.	धीमति	धीमतोः	धीमत्सु
सं	हे धीमन्	हे धीमन्तौ	हे धीमन्तः

एवं श्रीमत्, गोमत्, प्रभृतयो मत्वन्ताः, भगवत्, यशस्वत्, मघवत्, प्रभृतयो, वत्वन्तशब्दाश्च ।

(३३) तकारान्तः पुल्लिङ्गो 'गच्छत्' शब्दः ।

प्र.	गच्छन्	गच्छन्तौ	गच्छन्तः

शेषं धीमत् (३३) शब्दवत् ।

एवं गायत् नृत्यत्, इच्छत्, चोरयत्, भवत् इत्यादयः शतृन्ताश्शब्दाः ।

(३४) तकारान्तः पुल्लिङ्गो 'ददत्' शब्दः ।

प्र.	ददत्	ददतौ	ददतः
द्वि.	ददतम्	ददतौ	ददतः

इत्यादि मरुत् (३२) शब्दवत् ।

एवं कर्मकृत्, जाग्रत् इत्यादय ।

(३५) तकारान्तः पुल्लिङ्गो 'महत्' शब्दः ।

प्र.	महान्	महान्तौ	महान्तः
द्वि.	महान्तम्	महान्तौ	महतः
सं	हे महन्	हे महान्तौ	हे महान्तः

शेषं धीमत् (३२) शब्दवत् ।

(३६) दकारान्तः पुल्लिङ्गः 'सुहृद्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	सुहृत	सुहृदौ	सुहृदः
द्वि.	सुहृदम्	सुहृदौ	सुहृदः
तृ.	सुहृदा	सुहृद्भ्याम्	सुहृद्भिः
च.	सुहृदे	सुहृद्भ्याम्	सुहृद्भ्यः
पं.	सुहृदः	सुहृद्भ्याम्	सुहृद्भ्यः
ष.	सुहृदः	सुहृदोः	सुहृदाम्
स.	सुहृदि	सुहृदोः	सुहृत्सु

(३७) नकारान्तः पुल्लिङ्गो 'राजन्' शब्दः ।

प्र.	राजा	राजानौ	राजानः
द्वि.	राज्ञानम्	राजानौ	राज्ञः
तृ.	राज्ञा	राजभ्याम्	राजभिः
च.	राज्ञे	राजभ्याम्	राजभ्यः
पं.	राज्ञः	राजभ्याम्	राजभ्यः
ष.	राज्ञः	राज्ञोः	राज्ञाम्
स.	राज्ञि, राजनि	राज्ञोः	राजसु
सं.	हे राजन्	हे राजानौ	हे राजानः

एवं लाघमन्, गरिमन्, महिमन्, इत्यादयः ।

(३८) नकारान्तः पुल्लिङ्गः 'आत्मन्' शब्दः ।

प्र.	आत्मा	आत्मानौ	आत्मानः
द्वि.	आत्मानम्	आत्मानौ	आत्मनः
तृ.	आत्मना	आत्मभ्याम्	आत्मभिः

आत्मन् शब्दः—(*Concluded*)

	एकवचनम्	द्विवचनम्	बहुवचनम्
च.	आत्मने	आत्मभ्याम्	आत्मभ्यः
पं.	आत्मनः	आत्मभ्याम्	आत्मभ्यः
ष.	आत्मनः	आत्मनोः	आत्मनाम्
स.	आत्मनि	आत्मनोः	आत्मसु
सं.	हे आत्मन्	हे आत्मानौ	हे आत्मानः

एवं ब्रह्मन्, यज्वन्, इत्यादयः ।

(३९) नकारान्तः पुल्लिङ्गः 'श्वन्' शब्दः ।

प्र.	श्वा	श्वानौ	श्वानः
द्वि.	श्वानम्	श्वानौ	शुनः
तृ.	शुना	श्वभ्याम्	श्वभिः
सं	हे श्वन्	हे श्वानौ	हे श्वानः

इत्यादि ।

(४०) नकारान्तः पुल्लिङ्गो 'युवन्' शब्दः ।

प्र.	युवा	युवानौ	युवानः
द्वि.	युवानम्	युवानौ	यूनः
तृ.	यूना	युवभ्याम्	युवभिः

इत्याद ।

(४१) नकारान्तः पुल्लिङ्गो 'मघवन्' शब्दः ।

प्र.	मघवा	मघवानौ	मघवानः
द्वि.	मघवानम्	मघवानौ	मघोनः

मघवन् शब्दः—(*Concluded*)

	एकवचनम्	द्विवचनम्	बहुवचनम्
तृ.	मघोना	मघवभ्याम्	मघवभिः
सं.	हे मघवन्	हे मघवानौ	हे मघवानः

इत्यादि ।

(४२) नकारान्तः पुल्लिङ्गो 'पथिन्' शब्दः ।

प्र. सं.	पन्थाः	पन्थानौ	पन्थानः
द्वि.	पन्थानम्	पन्थानौ	पथः
तृ.	पथा	पथिभ्याम्	पथिभिः
च.	पथे	पथिभ्याम	पथिभ्यः
पं.	पथः	पथिभ्याम्	पथिभ्यः
ष.	पथः	पथोः	पथाम्
स.	पथि	पथोः	पथिषु

एव मथिन्, ऋभुक्षिन् , शब्दौ ।

(४३) नकारान्तः पुल्लिङ्गः 'शार्ङ्गिन्' शब्दः ।

प्र.	शार्ङ्गी	शार्ङ्गिणौ	शार्ङ्गिणः
द्वि.	शार्ङ्गिणम्	शार्ङ्गिणौ	शार्ङ्गिणः
तृ.	शार्ङ्गिणा	शार्ङ्गिभ्याम्	शार्ङ्गिभिः
च.	शार्ङ्गिणे	शार्ङ्गिभ्याम्	शार्ङ्गिभ्यः
पं.	शार्ङ्गिणः	शार्ङ्गिभ्याम्	शार्ङ्गिभ्यः
ष.	शार्ङ्गिणः	शार्ङ्गिणोः	शार्ङ्गिणाम्
स.	शार्ङ्गिणि	शार्ङ्गिणोः	शार्ङ्गिषु
सं.	हे शार्ङ्गिन्	हे शार्ङ्गिणौ	हे शार्ङ्गिणः

एवं गुणिन्, करिन्, ज्ञानिन् इत्यादय. ।

(४४) सकारान्तः पुल्लिङ्गो 'वेधस्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	वेधाः	वेधसौ	वेधसः
द्वि.	वेधसम्	वेधसौ	वेधसः
तृ.	वेधसा	वेधोभ्याम्	वेधोभिः
च.	वेधसे	वेधोभ्याम्	वेधोभ्यः
पं.	वेधसः	वेधोभ्याम्	वेधोभ्यः
ष.	वेधसः	वेधसोः	वेधसाम्
स.	वेधसि	वेधसोः	वेधस्सु

एवं चन्द्रसस्, सुमनस्, इत्यादय ।

(४५) सकारान्तः पुल्लिङ्गो 'विद्वस् शब्दः ।

प्र.	विद्वान्	विद्वांसौ	विद्वांसः
द्वि.	विद्वांसम्	विद्वांसौ	विदुषः
तृ.	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
च.	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पं.	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
ष.	विदुषः	विदुषोः	विदुषाम्
स.	विदुषि	विदुषोः	विद्वत्सु
सं.	हे विद्वन्	हे विद्वांसौ	हे विद्वांसः

एवं सेदिवस्, तस्थिवस् इत्यादयो वस्वन्तशब्दाः ।

(४६) सकारान्तः पुल्लिङ्गो 'पुंस्' शब्दः ।

प्र.	पुमान्	पुमांसौ	पुमांसः
द्वि.	पुमांसम्	पुमांसौ	पुंसः

पुंस शब्दः—(*Concluded*).

	एकवचनम्	द्विवचनम्	बहुवचनम्
तृ.	पुंसा	पुंभ्याम्	पुंभिः
च.	पुंसे	पुंभ्याम्	पुंभ्यः
पं.	पुंसः	पुंभ्याम्	पुंभ्यः
ष.	पुंसः	पुंसोः	पुंसाम्
स.	पुंसि	पुंसोः	पुंसु
सं.	हे पुमान्	हे पुमांसौ	हे पुमांसः

(४७) शकारान्तः पुल्लिङ्गो 'विश्' शब्दः ।

प्र.	विट्	विशौ	विशः
द्वि.	विशं	विशौ	विशः

(४८) शकारान्तः पुल्लिङ्ग. 'तादृश्' शब्दः ।

प्र.	तादृक्	तादृशौ	तादृशः
द्वि.	तादृशम्	तादृशौ	तादृशः
तृ.	तादृशा	तादृग्भ्याम्	तादृग्भिः

इत्यादि ।

(४९) षकारान्तः पुल्लिङ्गो 'द्विष्' शब्दः ।

प्र. सं.	द्विट्	द्विषौ	द्विषः
द्वि.	द्विषम्	द्विषौ	द्विषः
तृ.	द्विषा	द्विड्भ्याम्	द्विड्भिः
च.	द्विषे	द्विड्भ्याम्	द्विड्भ्यः

इत्यादि ।

(५०) हकारान्तः पुल्लिङ्गो 'लिह्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	लिट्	लिहौ	लिहः
द्वि.	लिहम	लिहौ	लिहः
तृ.	लिहा	लिड्भ्याम्	लिड्भिः

इत्यादि ।

(५१) हकारान्तः पुल्लिङ्गः 'अनडुह्' शब्दः ।

प्र.	अनड्वान्	अनडाहौ	अनड्वाहः
द्वि.	अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ.	अनडुहा	अनडुद्भ्याम	अनडुद्भिः
च.	अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः
प.	अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः
ष.	अनडुहः	अनडुहो.	अनडुहाम्
स.	अनडुहि	अनडुहोः	अनडुत्सु
सं.	हे अनड्वान	हे अनडाहौ	हे अनड्वाहः

इति हलन्ता. पुल्लिङ्गा. ।

अथ हलन्तस्त्रीलिङ्गसाधारणशब्दाः ।

---

(५२) चकारान्तः स्त्रीलिङ्गो 'वाच्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	वाक्	वाचौ	वाचः
द्वि.	वाचम्	वाचौ	वाचः
तृ.	वाचा	वाग्भ्याम्	वाग्भिः
च.	वाचे	वाग्भ्याम्	वाग्भ्यः
पं.	वाचः	वाग्भ्याम्	वाग्भ्यः
ष.	वाचः	वाचोः	वाचाम्
स.	वाचि	वाचोः	वाक्षु

(५३) जकारान्तः स्त्रीलिङ्गः 'स्रज्' शब्दः ।

प्र.	स्रक्	स्रजौ	स्रजः

इत्यादि भिषज् (३१) शब्दवत् ।

(५४) तकारान्तः स्त्रीलिङ्गः 'सरित्' शब्दः ।

प्र.	सरित्	सरितौ	सरितः

इत्यादि मरुत् (३२) शब्दवत् ।

(५५) दकारान्तः स्त्रीलिङ्गः 'शरद्' शब्दः ।

प्र.	शरत्	शरदौ	शरदः

इत्यादि सुहृद् (३७) शब्दवत् ।

(५६) रेफान्तः स्त्रीलिङ्गो 'गीर्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. सं.	गीः	गिरौ	गिरः
द्वि.	गिरम्	गिरौ	गिरः
तृ.	गिरा	गीर्भ्याम्	गीर्भिः
च.	गिरे	गीर्भ्याम्	गीर्भ्यः
पं.	गिरः	गीर्भ्याम्	गीर्भ्यः
ष.	गिरः	गिरोः	गिराम्
स.	गिरि	गिरोः	गीर्षु

(५७) वकारान्तः स्त्रीलिङ्गो 'दिव्' शब्दः ।

प्र. सं.	द्यौः	दिवौ	दिवः
द्वि.	दिवम्	दिवौ	दिवः
तृ.	दिवा	द्युभ्याम्	द्युभिः
च.	दिवे	द्युभ्याम्	द्युभ्यः
पं.	दिवः	द्युभ्याम्	द्युभ्यः
ष.	दिवः	दिवोः	दिवाम्
स.	दिवि	दिवोः	द्युषु

(५८) शकारान्तः स्त्रीलिङ्गो 'दिश्' शब्दः ।

प्र.	दिक्	दिशौ	दिशः
द्वि.	दिशम्	दिशौ	दिशः
तृ.	दिशा	दिग्भ्याम्	दिग्भिः

इत्यादि ।

(५९) षकारान्तः स्त्रीलिङ्गः 'प्रावृष्' शब्दः ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र.	प्रावृट्	प्रावृषौ	प्रावृषः

इत्यादि द्विष् (५०) शब्दवत् ।

(६०) सकारान्तः स्त्रीलिङ्गः 'आशिस्' शब्दः ।

प्र. सं.	आशीः	आशिषौ	आशिषः
द्वि.	आशिषम्	आशिषौ	आशिषः
तृ.	आशिषा	आशीर्भ्याम्	आशीर्भिः
च.	आशिषे	आशीर्भ्याम्	आशीर्भ्यः
पं.	आशिषः	आशीर्भ्याम्	आशीर्भ्यः
ष.	आशिषः	आशिषोः	आशिषाम्
स.	आशिषि	आशिषोः	आशीष्षु

(६१) हकारान्तः स्त्रीलिङ्गः 'उपानह्' शब्दः ।

प्र. सं.	उपानत्	उपानहौ	उपानहः
द्वि.	उपानहम्	उपानहौ	उपानहः
तृ.	उपानहा	उपानद्भ्याम्	उपानद्भिः
च.	उपानहे	उपानद्भ्याम्	उपानद्भ्यः
पं.	उपानहः	उपानद्भ्याम्	उपानद्भ्यः
